# अभ्यासप्रश्नपत्र(2024-25)
## कक्षा -नवमी
## विषयः- संस्कृत (१२२)

समय : होरात्रयम् अधिकतम अंक : ८०

सामान्य-निर्देशाः --

* कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रश्नाः सन्ति।
* अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति।
* अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् |उत्तरपुस्तिकायां च किमपि न लेखनीयम् ।
* प्रश्नपत्रस्य प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
* उत्तरलेखनात् पूर्व प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
* सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
* प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

प्रश्नपत्रस्वरूपम् -

अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| खण्डः (क) | अपठितावबोधनम् | -10 अङ्काः |
| खण्डः (ख) | रचनात्मककार्यम् | -15 अङ्का |
| खण्डः-(ग) | अनुप्रयुक्तव्याकरणम्- | -25 अङ्काः |
| खण्डः (घ) | पठितावबोधनम् | -30 अङ्काः |

### अपठितावबोधनम्
### (10 अङ्काः)

प्र.1 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत । (10)

एकदा भोजः नाम नृपः आसीत्। प्रजापालने अतिकुशलः सः स्नेहेन प्रजाः अपालयत्। परं नृपस्य पुत्राः मूर्खाः अशिक्षिताः गुणहीनाः च आसन्। एतस्मात् कारणात् राजा अतीव चिन्ताकुलः आसीत्। "किम् करोमि ? कथम् एतान् मम विद्याहीनपुत्रान् सर्वगुण- सम्पन्नान् करोमि ? इति विचिन्त्य सः अग्रिमे दिवसे राजसभायाम् आगत्य अघोषयत्- अस्ति कश्चिद् विद्वान् पण्डितः यः मम मूर्खपुत्रान् नीति-निपुणान् कर्तुं समर्थः भवेत् ? एतत् आकर्ण्य देवदत्तनाम पण्डितः किंचिद् विचार्य नृपं भोजम् उत्साहपूर्वकम् अवदत् "महाराज, अहं एतान् राजकुमारान् नीति-शास्त्रेषु निपुणान् कर्तुं समर्थोऽस्मि । ततः ते राजकुमाराः विद्यालाभाय देवदत्तपण्डितेन सह अगच्छन्। असौ पण्डितः पशु-पक्षि-जन्तूनां कथाभिः तेषां राजपुत्राणां मनोरञ्जनं कुर्वन् सरलतया तेभ्यः नीतिशास्त्रज्ञानं अशिक्षयत्। ततः आरभ्य ते राजपुत्राः सकलशास्त्रसंपन्नाः नीतिशास्त्रनिपुणाः च अभवन् |

अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) (1x2=2)

(i) नृपस्य नाम किम् आसीत् ?
(ii) प्रजापालने राजा कीदृशः आसीत् ?
(iii) के मूर्खाः अशिक्षिताः गुणहीनाः च आसन् ?

आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् ) (2x2=4)

(i) नृपः राजसभायाम् आगत्य किम् अघोषयत् ?
(ii) देवदत्तः केन प्रकारेण राजकुमारान् अशिक्षयत् ?
(iii) देवदत्तनाम पण्डितः नृपं भोजं किम् अवदत् ?

इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत – (1x1=1)

ई.यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्) (1x3=3)

(i) 'आसन्' इति क्रियापदस्य कर्तृपदं किम् ?
(क) पुत्राः (ख) मया (ग) नृपस्य (घ) गुणहीनाः

(ii) ‘सः अग्रिमे दिवसे राजसभायां आगत्य अघोषयत्’ अत्र 'सः' सर्वनाम पदं कस्मै प्रयुक्तम् ?
(क) पण्डिताय (ख) पुत्राय (ग) राज्ञे (घ)प्रजायै
(iii) 'नृपस्य पुत्राः गुणहीनाः आसन्’- अत्र विशेष्य पदं किम् ?
(क) आसन् (ख) राजा (ग) नृपस्य (घ) पुत्राः
(iv) 'शिक्षिताः' इति पदस्य कृते किं विलोमपदं प्रयुक्तम् ?
(क) गुणहीनाः (ख) मूर्खाः (ग) अशिक्षिताः (घ) पण्डिताः

खण्डः **(**ख**)**

रचनात्मक**-**कार्यम् **(15** अङ्काः**)**

प्र**.2** भवतः नाम दीपकः **,** नवमी कक्षायां पठति **|** वित्तकोषस्य**(Bank)** दोषकारणेन**,** अस्य वर्षस्य छात्रवृत्तिः भवान् न प्राप्तवान् **|** तत् शीघ्रनिवरणार्थं वित्तकोषस्य प्रबन्धकाय एकं पत्रं लिखतु **|**
**(5x1=5)**

प्र**.3** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां साहाय्येन पञ्चवाक्यानि संस्कृते लिखत।
**(1x5=5)**



| |
|---|
| पुष्पाणि, आगच्छन्ति, फ़रवरि मासे, राष्ट्रपतिभवनम्, विशालम्, विद्यालयच्छात्राः, सन्ति, वर्णरञ्जितम्, गौरवम्,आनन्दम्, अनुभवन्ति, विदेशीजनाः **\|** |

अथवा

मञ्जूषायां प्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत ।

‘रक्षाबन्धनम् ‘

मञ्जूषा

| |
|---|
| अग्रजस्य,अनुजस्य,भगिनी,स्वक्रमस्य,रक्षाबन्धनम्,रक्षासूत्रम्,करोति, करिष्यति, मणिबन्धे,मिष्टान्नम्, अन्यम्, पश्चात्, पश्यति, प्रसन्नः, दृष्ट्वा, प्रसन्नौ, पर्वणः, बन्धति \| |

प्र.**4** अधोलिखितानां केषाञ्चित् पञ्चवाक्यानां संस्कृत-भाषया अनुवादं कुरुत **(1x5=5)**

(i) सबको संस्कृत पसंद है- Everybody likes Sanskrit.

(ii) नदी के दोनों ओर पेड़ हैं-Thereare trees on bothsideofRiver.

(iii) लड़का कलम से लिखता है- Boy writing with a Pen.

(iv) सेवक ने अपना कार्य किया|- The servant did his work.

(v) मैं हमेशा सच बोलता हूँ - I always tell the truth.

(vi) संस्कृत दुनिया की पुरानी भाषा है Sanskrit is the OldestLanguage of the world.

खण्डः-(ग)

अनुप्रयुक्त-व्याकरणम् **(25** अङ्काः)

प्र.**5** अधोलिखितानां पदानां सन्धिं / सन्धिविच्छेदं वा कुरुत –

(केवलं प्रश्नचतुष्टयम्) (1x4=4)

(i)नर+उत्तमः (ii) सदैव (iii) नौ + इकः (iv) नि+अवसत् (v) कलिन्दात्मजा

प्र.**6** प्रदत्तविकल्पेभ्यः उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत –

(केवलं प्रश्नचतुष्टयम्) **(1x4=4)**

(i) अहं ...................... दुहिता अस्मि ।

(क) निर्धनमातुः (ख) निर्धनमात्रे (ग) निर्धनमातरः (घ) निर्धनमाता

(ii) मल्लिका .................................गता ।

(क) धर्मयात्रम् (ख) धर्मयात्राणाम् (ग) धर्मयात्रायाः (घ)धर्मयात्रायै

(iii) जनाः ..................... किं किं न कुर्वन्ति ।

(क) उदरपूरणे (ख) उदरपूरणाय (ग) उदरपूरणम् (घ) उदरपूरणस्य

(iv) वृक्षात् ............................................. पतन्ति

(क) जलबिन्दुः (ख) जलबिन्दोः (ग) जलबिन्दवः (घ) जलबिन्दुभिः

(v) 'पितरि' अत्र का विभक्तिः ?

(क) प्रथमा (ख) षष्ठी (ग) सप्तमि (घ) तृतीया

प्र.**7.** उचितैः धातुरूपैः रिक्तस्थानानि पूरयत –(केवलं प्रश्नचतुष्टयम्) **(1x4=4)**

(i) सर्वे सुखिनः ................ ।

(क) भवन्तु (ख) अस्तु (ग) अभवत् (घ) भविष्यति

(ii) 'गम्' धातु - लोट् लकारे - उत्तम -पुरुषे बहुवचनरूपम् अस्ति ।

(क) गच्छामि (ख) गच्छानि (ग) गच्छाम(घ) गच्छेम

(iii) त्वं ह्यः कुत्र .......... ।

(क) अगच्छः (ख) गतवान् (ग) गच्छेत् (घ) गच्छसि

(iv) वयं श्वः प्रातः संस्कृतं ............... ।

(क) पठिष्यामः (ख)पठामि (ग)पठति (घ)अपठाम

(v) ताः महिलाः मालां ..................... ।

(क) रचयसि (ख)रचयामि (ग)अरचयत् (घ)रचयन्ति

प्र.**8** कारक-उपपद-विभक्तिम् आश्रित्य विकल्पेभ्यः उचितपदानि चिनुत –

**(केवलं प्रश्नचतुष्टयम्)** **(1x4=4)**

(i) बालः ........................विभेति । ( सिंहः पञ्चमी )

(क) सिंहम् (ख) सिंहात् (ग) सिंहस्य (घ) सिंहेन

(ii) धर्मेण ............. न शोभते ।

(क) अलम् (ख) सह (ग) साकम् (घ) हीनः

(iii) सः ................... निवेदयति (गुरु चतुर्थी) ।

(क) गुरोः (ख) गुरुभिः (ग) गुरु (घ) गुरवे

(iv) .................. हीनः पशुभिः समानः । (विद्या तृतीया)

(क) विद्यां (ख) विद्यासु (ग) विद्यया (घ) विद्यायाः

(v) ........................ निकषा वृक्षाः सन्ति । (राजमार्ग द्वितीया)

(क) राजमार्गात् (ख) राजमार्गस्य (ग) राजमार्गं (घ) राजमार्गे

प्र.**9** रेखांकितपदेषु प्रकृतिः **-** प्रत्ययं विभज्य/ संयोज्य वा लिखत

**(केवलं प्रश्नत्रयम्).** **(1x3=3)**

(i) माता वस्त्रं प्र+क्षाल्+ल्यप् भोजनं पचति

(क) प्रक्षालय (ख) प्रक्षाल्य (ग) प्रक्षालय (घ) प्रक्षालयित्वा

(ii) बालकः पुस्तकानि आनेतुम् आपणं गच्छति।

(क) आ + नी + क्त्वा (ख) आ + नी + ल्यप् (ग) आ + नी + तुमुन्

(घ) आ + नी + क्त

(iii) शिष्यः गुरुं ................ उपविशति

(क) नम् + क्त्वा (ख) नम् + तुमुन् (ग) नम् + ल्यप् (घ) नम् + क्त

(iv) मल्लिका तु धर्मयात्रायै गम् +क्त

(क) गतम् (ख) गतः (ग) गन्ता (घ) गता

प्र.**10** अङ्कानां स्थाने उचितसंख्यापदानि संस्कृतभाषया लिखत **–**

**(केवलं प्रश्नचतुष्टयम्)** **(1/2x4=2)**

(i) मम विद्यालये ............ (14) अध्यापकाः सन्ति।

(ii) इन्द्रधनुषि .............. ( 7) वर्णाः भवन्ति ।

(iii) मम ................... (4) वाहनानि सन्ति।

(iv) क्रीडाक्षेत्रे ..................(3) छात्राः क्रीडन्ति ।

(v) सः ................. (1) पत्रम् लिखति।

प्र.**11** अधोलिखितपदेषु उपसर्गं संयोज्य/ विभज्य वा उत्तरं चिनुत **- (केवलं प्रश्नचतुष्टयम्)**

(1/2x4=2)

(i) परिजनः = ...........+............

(ii) दुस् + साहसः = ......................

(iii) संगतिः= ......+.......................

(iv) अनुनासिकः =................+................

(v) प्रति + आगच्छति = .............................

प्र.**12** निम्नलिखित**-**अव्ययपदानां रिक्तस्थानेषु प्रयोगं कुरुत**- (केवलं प्रश्नचतुष्टयम्)**

**(1x2=2)**

| |
|---|
| विना, उच्चैः, बहिः ,वृथा |

(i) शंखनाद ..................... भवति।
(ii) कक्षात् .....................मा गच्छेत्।
(iii) विद्यां .................जनाः अपूर्णाः भवन्ति ।
(iv) .......................न वक्तव्यम्।

खण्डः-घ
पठितावबोधनम् **(30** अङ्काः)

प्र.**13** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत**- (5)**
विलोक्य बालिका रोदितुमारब्धा। तं निवारयन्ती सा प्रार्थयत्- "तण्डुलान् मा भक्षय। मदीयामाता अतीव निर्धना वर्तते।" स्वर्णपक्षः काकः प्रोवाच, "मा शुचः। सूर्योदयात्प्राग् ग्रामाद्बहिः पिप्पलवृक्षमनु त्वया आगन्तव्यम्। अहं तुभ्यं तण्डुलमूल्यं दास्यामि।" प्रहर्षिता बालिका निद्रामपि न लेभे।
सूर्योदयात्पूर्वमेव सा तत्रोपस्थिता। वृक्षस्योपरि विलोक्य सा च आश्चर्यचकिता सञ्जाता यत् तत्र स्वर्णमयः प्रासादो वर्तते। यदा काकः शयित्वा प्रबुद्धस्तदा तेन स्वर्णगवाक्षात्कथितं"हंहो बाले! त्वमागता, तिष्ठ, अहं त्वत्कृते सोपानमवतारयामि, तत्कथय स्वर्णमयं रजतमयम् ताम्रमयं वा"? कन्या अवदत् "अहं निर्धनमातुः दुहिता अस्मि। ताम्रसोपानेनैव् आगमिष्यामि।" परं स्वर्णसोपानेन सा स्वर्ण- भवनम् आरोहत।
अ. एकपदेन उत्तरत **- (**केवलं प्रश्नद्वयम्**)** (1/2x2=1)
(i) बालिका किं कर्तुम् आरब्धा ?
(ii) 'मा शुचः' इति कः वदति ?
(iii) स्वर्णभवनं का आरोहत् ?
आ. पूर्णवाक्येन उत्तरत **- (**केवलं प्रश्नद्वयम्**)** (1x2=2)
(i) दुःखिता बालिका काकं किं प्रार्थयत् ?
(ii) बालिका किमर्थम् आश्चर्यचकिता सञ्जाता ?
(iii) स्वर्णगवाक्षात् काकेन किं कथितम् ?
इ. यथानिर्देशम् उत्तरत **- (**केवलं प्रश्नद्वयम्**)** (1x2=2)
(i) मदीयामाता इति बालिका कस्यै वदति?
(ii) 'प्रहर्षिता बालिका निद्रामपि न लेभे' अत्र क्रियापदमस्ति ?
(iii) प्रासादः इति शब्दस्य पर्यायपदम् किम् ?

प्र.**14** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत । **(5)**

तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः।
चकार बहुधा गात्रे व्रणान्पतगसत्तमः ।।
ततोऽस्य सशरं चापं मुक्तामणिविभूषितम् ।
चरणाभ्यां महातेजा बभञ्जास्य महद्धनुः ।।
स भग्नधन्वा विरथो हताश्वो हतसारथिः॥
अङ्केनादाय वैदेहीं पपात भुवि रावणः ।।

अ. एकपदेन उत्तरत**- - (**केवलं प्रश्नद्वयम्**)** (1/2x2=1)
(i) कः गात्रे व्रणं चकार ?
(ii) जटायुः कीदृशाभ्यां चरणाभ्यां गात्रे व्रणं चकार ?
(iii) कः भुवि पपात?

आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (1x2=2)
(i) हतसारथिः रावणः किं अकरोत् ?
(ii) रावणः वैदेहीं केन आदाय भुवि पपात ?
(iii) जटायुः कथं गात्रे व्रणं चकार ?
इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) (1x2=2)
(i)'निर्बलः' इत्यस्य किं विलोमपदम् अस्मिन् श्लोके प्रयुक्तम् ?
(ii) 'तीक्ष्णनखाभ्यां चरणाभ्यां' इत्यत्र किं विशेषणपदम् ?
(iii) 'अङ्केनादाय वैदेहीं पपात भुवि रावणः।' इत्यस्मिन् वाक्ये किं क्रियापदम् ?

प्र.15 अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत । **(5)**
कुम्भकारः -(घटरचनायां लीनः गायति)
ज्ञात्वाऽपि जीविकाहेतोः रचयामि घटानहम्।
जीवनं भङ्गरं सर्वं यथैष मृत्तिकाघटः ॥
चन्दनः- नमस्करोमि तात ! पञ्चदश घटान् इच्छामि। किं दास्यसि ?
देवेशः -कथं न? विक्रयणाय एव एते। गृहाण घटान्। पञ्चशतोत्तर-रुप्यकाणि च देहि।
चन्दनः- साधु। परं मूल्यं तु दुग्धं विक्रीय एव दातुं शक्यते ।
देवेशः- क्षमयतां पुत्र! मूल्यं विना तु एकमपि घंट न दास्यामि।
मल्लिका -(स्वाभूषणं दातुमिच्छति) तात! यदि अधुनैव मूल्यम् आवश्यकं तर्हि, गृहाण एतत् आभूषणम्।
देवेशः-पुत्रिके! नाहं पापकर्म करोमि । कथमपि नेच्छामि त्वाम् आभूषणविहीनां कर्तुम्। नयतु यथाभिलषितान्घटान्। दुग्धं विक्रीय एव घटमूल्यम् ददातु।
उभौ -धन्योऽसि तात! धन्योऽसि।
अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (1/2x2=1)
(i) कः घटं रचयति ?
(ii) चन्दनः कति घटान् इच्छति ?
(iii) स्वाभूषणं का दातुमिच्छति ?
आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (1x2=2)
(i) देवेशः मल्लिकां किं वदति ?
(ii) कुम्भकारः किम् इति गायति ?
(iii) देवेशः घटस्य मूल्यं कियत् इति वदति ?
इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) (1x2=2)
(i) 'रचयामि' इति क्रियापदस्य कर्तृपदं किम्?
(ii) 'अधुना' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?
(iii)'विक्रीय एव घटमूल्यम् ददातु' इत्यत्र क्रियपदम् अस्ति ?

प्र.16. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं प्रश्नचतुष्टयम्) (1x4=4)
(i) <u>ग्रामे</u> निर्धना स्त्री अवसत्।
(ii) कुक्कुरः <u>मानुषाणां</u> मित्रम् अस्ति।
(iii) <u>मल्लिका</u> स्वपतिं चतुरतमं मन्यते।
(iv) <u>धर्मसर्वस्वं</u> श्रुत्वा अवधार्यताम्।
(v) <u>रक्षानियोगकरणात्</u> मया न भ्रष्टव्यम् इति।

प्र.17 मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत-
**(1/2x6=3)**
गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा।

गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ।।
अन्वयः- पुरुषैः सदा .....(i)......एव हि प्रयत्नः कर्तव्यः। गुणयुक्तः .....(ii).........अपि .......(iii).........ईश्वरैः समः न (न भवति)।।
आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानाम्।।

अन्वयः - आरम्भगुर्वी.......(iv).......क्षयिणी (भवति), पुरा ........(v).............(भवति) पश्चात् च वृद्धिमती (भवति) दिनस्य पूर्वार्द्धपरार्द्ध-छाया इव खलसज्जनानां .......(vi).......भिन्ना (भवति)।।
लघ्वी, अगुणैः , क्रमेण, दरिद्रः, मैत्री गुणेषु,

अथवा
अधोलिखितपद्यांशस्य भावार्थं मञ्जूषायां प्रदत्तशब्दैः पूरयत **– (1x3=3)**
लतानां नितान्तं सुमं शान्तिशीलम् ,
चलेदुच्छलेत्कान्तसलिलं सलीलम्,
तवाकर्ण्य वीणामदीनां नदीनाम् ।।**4**।। निनादय**...**।।
भावार्थः- तव .....(i)........वीणाम् आकर्ण्य ........(ii).............नितान्तं शान्तिशीलं सुमं चलेत् नदीनां कान्तसलिलं .....(iii).......उच्छलेत्। अये वाणि ! नवीनां वीणां निनादय.......... ।
लतानां अदीनां सलीलम्

प्र**.18** अधोलिखितं कथांशं समुचितक्रमेण लिखत **–** **(1/2x8=4)**
(i) तदा दुःखितः बालकः पलायमानं कमपि श्वानम् अवलोकयत्।
(ii) सः अचिन्तयत् – भवन्तु एते वराकाः पुस्तकदासाः। अहं तु आत्मानं विनोदयिष्यामि।
(iii) भूयो भूयः हठमाचरति बाले सः मधुकर अगायत् – वयं हि मधुसंग्रहव्यग्रा” इति।
(iv) कथमस्मिन् जगति प्रत्येकं स्व-स्वकार्ये निमग्नो भवति।
(v) स बालः अन्यत्र दत्तदृष्टिः चञ्च्वा तृणशलाकादिकम् आददानम् एकं चटकम् अपश्यत् |
(vi) ततः प्रभृति स विद्याव्यसनी भूत्वा महतीं, वैदुषीं प्रथां सम्पदं च अलभत।
(vii) भ्रान्तः कश्चन बालः पाठशालागमनवेलायां क्रीडितुम् अगच्छत् ।
(viii) सः पुष्पोद्यानं गच्छन्तं मधुकरं दृष्ट्वा तं क्रीडितुं द्वित्रिवारम् आह्वयत्।

प्र**.19 (क)** रेखाङ्कितपदानि आधृत्य प्रसंगानुसारं समुचितम् अर्थं चित्वा लिखत**- (1/2x4=2)**
(i) <u>भ्रान्तः</u> बालः क्रीडितुम् अगच्छत् ।
(क) भ्रमयुक्तः (ख) निर्भयः (ग) तन्द्रालुः (घ) बलवान्
(ii) लतानां नितान्तं <u>सुमं</u> शान्तिशीलम् ।
(क) पुष्पम् (ख) फलम् (ग) वनम् (घ) पत्रम्
(iii) तण्डुलान्निक्षिप्य तयापि <u>स्वसुतां</u> रक्षार्थं नियुक्ता ।
(क) स्वपुत्रिम् (ख) स्वमातुः (ग) स्वजनम् (घ) स्वर्णम्
(iv) जीवनं <u>भङ्गुरं</u> सर्वं यथैष मृत्तिकाघटः ।
(क) सुन्दरम् (ख) शाश्वतम् (ग) भन्जनशीलम् (घ) कष्टमयम्

**(ख)** अधोलिखितशब्दानां तेषाम् अर्थैः सह मेलनं कुरुत **(1/2x4=2)**

| | |
|---|---|
| (i) दृष्टिपथम् | (i) तीरे |
| (ii) रिक्ताः | (ii) अलीनाम् |
| (iii) भ्रमराणाम् | (iii) पूरिताः |
| (iv) तटे | (iv) दृष्टेः पन्थाः |

*******